# ॥ मांडूकोपनिषत्प्रारंभः ॥

आथ० श्रीमद्धनुमद्भीमसध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ । ॐमित्येतदक्षरमि निषत्
॥ १ ॥ दंसर्वं ॥ तस्योपव्याख्यानंभूतंभवद्भविष्यदिति ॥१॥ सर्वमोंकारएवयच्चान्यत्त्रिकालातीतंतदप्योंकारएव । खं० ६
सर्वंह्येतद्ब्रह्म । अयमात्माब्रह्म ॥२॥ सोयमात्माचतुष्पात् । जागरितस्थानोबहिःप्रज्ञःसप्तांगएकोनविंशति
मुखःस्थूलभुग्वैश्वानरःप्रथमःपादः ॥३॥ स्वप्नस्थानोंतःप्रज्ञःसप्तांगएकोनविंशतिमुखःप्रविविक्तभुक्तैजसोद्वि
तीयःपादः ॥४॥ यत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतितत्सुषुप्तं सुषुप्तस्थानएकीभूतःप्रज्ञानघन
एवानंदमयोह्यानंदभुक्चेतोमुखःप्राज्ञस्तृतीयःपादः ॥५॥ एषसर्वेश्वरएषसर्वज्ञएषोंतर्यामी । एषयोनिःसर्वस्य
प्रभवाप्ययौहिभूतानां ॥६॥ अत्रैतेश्लोकाभवंति । बहिःप्रज्ञोविभुर्विश्वोह्यंतःप्रज्ञस्तुतैजसः । घनप्रज्ञस्तथा
प्राज्ञएकएवत्रिधास्मृतः ॥७॥ दक्षिणाक्षिमुखेविश्वोमनस्यंतस्तुतैजसः । आकाशेचहृदिप्राज्ञस्त्रिधादेहेव्यव
स्थितः ॥८॥ विश्वोहिस्थूलभुङ्नित्यंतैजसःप्रविविक्तभुक् । आनंदभुक्तथाप्राज्ञस्त्रिधाभोगंनिबोधत ॥ ९ ॥
स्थूलंतर्पयतेविश्वंप्रविविक्तंतुतैजसं । आनंदंचतथाप्राज्ञंत्रिधातृप्तिंविजानथ ॥१०॥ त्रिषुधामसुयद्भोज्यंभो ॥६६३॥
क्तायश्चप्रकीर्तितः । वेदैतदुभयंयस्तुसभुंजानोनलिप्यते ॥११॥ प्रभवस्सर्वभावानांसतामितिविनिश्चयः ।

सर्वंजनयतिप्राणश्चेतोंशून्पुरुषःपृथक् ॥१२॥ विभूतिंप्रसवंत्वन्येमन्यंतेसृष्टिचिंतकाः । स्वप्नमायासरूपेति
सृष्टिरन्यैर्विकल्पिता ॥१३॥ इच्छामात्रंप्रभोस्सृष्टिरितिसृष्टौविनिश्चिताः । कालात्प्रसूतिंभूतानांमन्यंतेका
लचिंतकाः॥१४॥भोगार्थंसृष्टिरित्यन्येक्रीडार्थमितिचापरे । देवस्यैषस्वभावोयमाप्तकामस्यकास्पृहेति॥१५॥
प्रथमःखंडः ॥१॥ ॥ नांतःप्रज्ञंनबहिःप्रज्ञंनोभयतःप्रज्ञंनप्रज्ञानघनंनप्रज्ञंनाप्रज्ञमदृष्टमव्यवहार्यमलक्षणमचिं
त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारंप्रपंचोपशमंशिवमद्वैतंचतुर्थंमन्यंते सआत्मासविज्ञेयः ॥१॥ अत्रैतेश्लोका
भवंति । निवृत्तेःसर्वदुःखानामीशानःप्रभुरव्ययः । अद्वैतःसर्वभावानांदेवस्तुर्योविभुःस्मृतः ॥२॥ कार्यका
रणबद्धौताविष्येतेविश्वतैजसौ । प्राज्ञःकारणबद्धस्तुद्वौतुतुर्येनसिद्ध्यतः ॥३॥ नात्मानंनपरांश्चैवनसत्यंना
पिचानृतं । प्राज्ञःकिंचनसंवेत्तितुर्यंतत्सर्वदृक्सदा ॥४॥ द्वैतस्याग्रहणंतुल्यमुभयोःप्राज्ञतुर्ययोः । बीजनिद्रा
युतःप्राज्ञःसाचतुर्येनविद्यते ॥५॥ स्वप्ननिद्रायुतावाद्यौप्राज्ञस्त्वस्वप्ननिद्रया । ननिद्रांनैवचस्वप्नंतुर्येपश्यंतिनि
श्चिताः ॥६॥ अन्यथागृह्णतःस्वप्नोनिद्रातत्त्वमजानतः । विपर्यासेतयोःक्षीणेतुरीयंपदमश्नुते ॥७॥ अना
दिमाययासुप्तोयदाजीवःप्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतंबुध्यतेतदा ॥८॥ प्रपंचोयदिविद्येतनिवर्तेतन

आथ० संशयः । मायामात्रमिदंद्वैतमद्वैतंपरमार्थतः ॥९॥ विकल्पोविनिवर्तेतकल्पितोयदिकेनचित् । उपदेशाद निषत्
॥ २ ॥ यंवादोज्ञातेद्वैतंनविद्यतइति ॥१०॥ द्वितीयःखंडः ॥२॥ ॥ सोयमात्माध्यक्षरमोंकारोऽधिमात्रंपादामात्रा
अकारउकारोमकारइति । जागरितस्थानोवैश्वानरोकारःप्रथमामात्रा । आप्तेरादिमत्त्वाद्वा आप्नोतिहवै खं० ४
सर्वान्कामानादिश्चभवति यएवंवेद ॥१॥ स्वप्नस्थानस्तैजसउकारोद्वितीयामात्रा । उत्कर्षादुभयत्वाद्वा ।
उत्कर्षतिहवैज्ञानसंततिंसमानश्चभवतिनास्याब्रह्मवित्कुलेभवति यएवंवेद ॥२॥ सुषुप्तस्थानःप्राज्ञोमकारस्तृ
तीयामात्रा । मितेरपीतेर्वा । मिनोतिहवाइदंसर्वमपीतिश्चभवति यएवंवेद ॥३॥ अत्रैतेश्लोकाभवंति ।
विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटं । मात्रासंप्रतिपत्तौस्यादाप्तिसामान्यमेवच ॥४॥ तैजसस्योत्व
विज्ञानउत्कर्षोदृश्यतेस्फुटं । मात्रासंप्रतिपत्तौस्यादुभयत्वंतथाविधं ॥५॥ मकारभावेप्राज्ञस्यमानसामान्य
मुत्कटं । मात्रासंप्रतिपत्तौतुलयसामान्यमेवच ॥६॥ त्रिषुधामसुयत्तुल्यंसामान्यंवेत्तिनिश्चितं । सपूज्यस्स
र्वभावानांवंद्यश्चैवमहामुनिः ॥७॥अकारोनयतेविश्वमुकारश्चापितैजसं । मकारश्चपुनःप्राज्ञंनामात्रेविद्यते ॥६६४॥
ऽगतिरिति ॥८॥ तृतीयःखंडः ॥३॥ ॥ अमात्रश्चतुर्थोऽव्यवहार्यःप्रपंचोपशमःशिवोद्वैतॐकारः आत्मैव

संविशत्यात्मनात्मानं यएवंवेद ॥१॥ अत्रैतेश्लोकाभवंति । ओंकारंपादशोविद्यात्पादामात्रानसंशयः ।
ओंकारंपादशोज्ञात्वानकिंचिदपिचिंतयेत् ॥२॥ युंजीतप्रणवेचेतःप्रणवोब्रह्मनिर्भयं । प्रणवेनित्ययुक्तस्यन
भयंविद्यतेक्वचित् ॥३॥ प्रणवोह्यपरंब्रह्मप्रणवश्चपरंस्मृतः। अपूर्वोनंतरोबाह्योनपरःप्रणवोव्ययः॥४॥सर्वस्य
प्रणवोह्यादिर्मध्यमंतस्तथैवच । एवंहिप्रणवंज्ञात्वाव्यश्नुतेतदनंतरं ॥५॥ प्रणवंहीश्वरंविद्यात्सर्वस्यहृदयेस्थि
तं । सर्वव्यापिनमोंकारंमत्वाधीरोनशोचति ॥६॥ अमात्रोनंतमात्रश्चद्वैतस्योपशमश्शिवः। ॐकारोविदि
तोयेनसमुनिर्नेतरोजनःसमुनिर्नेतरोजनइति ॥७॥ चतुर्थःखंडः ॥४॥ इतिश्रीमांडूकोपनिषत्समाप्ता ॥
श्रीमद्धनुमद्भीमम ध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥हरिःॐ॥ पूर्णानंदज्ञानशक्तिस्व
रूपंनित्यमव्ययं। चतुर्धासर्वभोक्तारंवंदेविष्णुंपरंपदं। मंडूकरूपिणावरुणेनचतूरूपोनारायणःस्तूयते । ध्या
यन्नारायणंदेवंप्रणवेनसमाहितः । मंडूकरूपीवरुणस्तुष्टावहरिमव्ययमितिपाद्मे । ओमित्युक्तंतुयद्ब्रह्मतदक्ष
रमुदाहृतं । ओतमत्रजगद्यस्मादोंतस्माद्भगवान्हरिः। तदिदंगुणपूर्त्यैवसर्वमित्येवशब्दितं । भाविभूतभव
त्कालेष्वेकरूपतयाहरिः। सर्वदानित्यइत्येषाव्याख्योंकारस्यकीर्तितेतिबृहत्संहितायां ॥१॥ ओमित्याक्रियते

११२

यस्मादोंकारोसावतःपरः। सर्वत्वमितिपूर्णत्वंतन्नान्यस्यहरेःक्वचिदितिनैर्गुण्ये । सर्वमोंकारएवेत्यन्यस्यपू
र्णत्वनिवारणं। त्रिकालातीतत्वंचतस्यैव। प्रकृतेरपित्रिकालातीतत्वंविद्यतइत्यन्यदितिविशेषणं । परमं
योमहद्ब्रह्म। तदेवब्रह्मपरमंकवीनां। पूर्णमदःपूर्णमिदमित्यादिषुप्रसिद्धंचब्रह्मणःपूर्णत्वमित्याह। सर्वंह्येत
द्ब्रह्मेति। श्रीब्रह्मादिसकलदेहेषुस्थित्वाआदानादिकर्तायोयंकश्चित्प्रतीयते। जीवानामस्वातंत्र्यदर्शनात्सो
पिसएवेतिदर्शयत्ययमात्माब्रह्मेति। पूर्णस्तुहरिरेवैकोनान्यत्पूर्णंकदाचन। विनाचप्रकृतिंनान्यत्कालाती
तंपरात्मनः। कालश्चैवदिशोवेदाःप्रकृत्यात्मानईरिताः। अभिमानात्तुजीवानांनकालातीतताभवेत्।मुक्ता
नामपिपूर्वत्रकालसंबंधईरितः। पूर्णत्वंचसदाविष्णोःप्रसिद्धंसर्ववेदतः। सोयंविष्णुरमाब्रह्मरुद्रानंतादिगःस
दा। आदानादनकर्तृत्वादात्मातेषामगोचरः। इतिमंडूकरूपीसन्ददर्शवरुणःश्रुतिमितिहरिवंशेषु॥२॥चतु
र्धावस्थितोदेहेपरमात्मासनातनः। वैश्वानरोजागरितस्थानगोगजवक्त्रकः। निर्माताबाह्यसंवित्तेर्जीवानांत
द्गोचरः। अष्टादशमुखान्यस्यपुमाकाराणिसर्वशः। मध्यमंतुगजाकारंचतुर्बाहुःपरःपुमान्। पादौहस्तिक ॥६६५॥
रोहस्ताइतिसप्तांगईरितः। स्थूलान्भोगानिंद्रियैःसशुभान्भुंक्तेनचाशुभान्। विश्वंस्थूलंसमुद्दिष्टंसर्वगम्यत्व

हेतुतः। तत्संबंधीनरोनाशाद्वैश्वानरउदाहृतः। विनायकस्तुविश्वस्यध्यानाद्वैद्गजवक्रतां । तथैवतैजसध्याना
त्रिध्यानादिंद्रइंद्रतां । चतुर्ध्यानाच्चरुद्रत्वंरुद्रआपजनार्दनात् । एवंभूतगुणोविष्णुश्चतुरात्मापरात्परइतिम
हायोगे॥३॥जाग्रद्दर्शनसंस्काररूपत्वात्स्वप्नगंतुयत् । प्रविविक्तंतुतज्ज्ञानकारणोंतर्ज्ञउच्यतइतिवाराहे॥४॥
सुषुप्तंतुतमोज्ञेयंहरिंप्राप्यतदावृतः । नकामयेन्नैवपश्येज्जीवःस्वात्मतमोविना । कालंचतस्यस्थानस्यपतिःप्रा
ज्ञोहरिःस्वयं। चित्तस्थोदर्शयेत्तस्मात्तैजसःस्वप्नकृद्धरिः । नबाह्यंज्ञापयेद्यस्मात्प्राज्ञस्तेनजनार्दनः। एकीभावं
व्रजेतांचतेनविश्वश्चतैजसः । एकीभूतस्तदाप्राज्ञोघनोजीवस्तमोवृतः । तन्मात्रस्यसकालस्यघनप्रज्ञःप्रदर्श
नादितिप्रकाशिकायां । आनंदमयःपूर्णानंदः। चेतोमुखः ज्ञानस्वरूपमुखः । प्रज्ञानघनइतिविपरीतसमा
सः । घनप्रज्ञइतिवक्ष्यमाणत्वात् । विषयभोगंविनानंदमात्रभुक्त्वादानंदभुगितिविशेषः । आनंदमयचेतो
मुखसर्वज्ञत्वसर्वेश्वरत्वादिचतुष्टयेपिसमं । अन्यत्रातिदेशार्थमेकत्रानंदमयत्वंचेतोमुखत्वंचोक्तं॥५॥ एषच
तूरूपआत्मासर्वज्ञत्वसर्वेश्वरत्वादिलक्षणः । परमात्माचतूरूपःसर्वप्राणिशरीरगः । विश्वश्चतैजसःप्राज्ञस्तुरी
यश्चेतिकथ्यते । तानिरूपाणिसर्वाणिपूर्णानंदमयानितु । चेतोमुखानिसर्वाणिपूर्णज्ञानस्वरूपतः । मुखश

मांडू० ब्द्स्तुसर्वस्यदेहस्याप्युपलक्षणः। तथापिसुखशब्दोयंपूर्णत्वंसूचयेद्विभोः। ज्ञानस्यमुख्यवाचित्वान्सुखवाच्य भाष्यं
॥ ४ ॥ पिसन्स्वतइतिमार्कंडेये । पूर्णानंदस्वरूपस्यक्रीडाभोगोनचान्यथा । यथादित्यस्यदीपेननविशेषोस्तिकश्च
नेतिब्रह्मतर्के ॥६॥ प्रमाणस्यप्रमाणंचबलवद्विद्यतेमुने । ब्रह्मदृष्टान्यतोमंत्रान्प्रमाणंसलिलेश्वरः । अत्रश्लो खं० १
काभवंतीतिचकारैवपृथक्पृथगितिगारुडे । खंडचतुष्टयेपिपृथक्पृथक् । प्रभवःसर्वभावानांविष्णुरेवनसंश
यः । इत्थंसतांनिश्चयःस्यादन्यथात्वसतांभवेत् ॥७–११॥ सर्वस्यहिप्रणेतृत्वात्प्राणोनारायणःपरः । तांसृ
ष्टिंबहुधाप्राहुर्ज्ञानिनोज्ञानिनस्तथा ॥१२॥ विष्णुर्विकृतिमायातिमहदादिस्वरूपिणीं । तच्चद्विविधभूतिस्तु
सृष्टिःप्रोक्ताह्यपंडितैः । स्वप्नमायासरूपाचकेचिदज्ञाजनाविदुः ॥१३॥ अविकारस्यचिन्मात्रस्वेच्छयैवाखि
लंजगत् । उत्पद्यतइतिप्राज्ञाःप्राहुर्ब्रह्मादयोखिलाः । पूर्णशक्तेःकुतोमायासार्वज्ञात्स्वप्नवत्कुतः । सर्वदोषव्य
तीतस्यविकारःकुतइष्यते । तस्मादेवाविकारस्यविष्णोरिच्छावशादिदं । यथार्थमेवसंभूतमितिवेदवचोखि
लं। केचित्कालतएवैतांसृष्टिमाहुरकोविदाः । केचिद्रुद्राद्ब्रह्मणश्चप्रधानादितिचापरे । विमूढाःसर्वएवैतेयतो ॥ ६६६ ॥
नारायणःपरः । सर्वकर्तासर्वशक्तिरेकएवचनापरः । प्रधानकालब्रह्मेशमुखाःसर्वेपितद्वशाः॥१४॥ तस्यापि